M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 770

Title: Sanyasa Vidhi

770

सँन्यासविधिः

Incomplete

		Saṃnyāsa Vidhi	Title
			Author
			Editor
			Year, Vols.
			Publisher
770		Ends abruptly	Remarks

770

सन्यास वीथी-

सं० श्रीगणेशाय नमः आसन्ने संकटे घोरे चोरव्याघ्रादिसंकुले भयभीतस्य संन्यासं अंगिरा मुनिरब्रवी
२ त् १ आतुराणां च संन्यासे न विधिर्नैव च क्रिया प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेत् २ तथा च स्मृ
द्वं३ तिः आत्मश्राद्धं परित्यज्य विरजाहोमवर्जितं संन्यासमातुरः कुर्यात् महावाक्यविवर्जितं ३ अत एवा
तुरस्य संकल्पप्रैषमात्रोच्चारणेन पर्याप्तिर्मानात्मकं श्रूयते तथा च दक्षः संन्यासाद्ब्राह्मणः स्थाने
वैराग्यात्प्रकृतौ लयः ज्ञानात्कैवल्यमाप्नोतीति तिस्रो गतयः स्मृताः अत एव संन्यस्तमिति यो ब्रूया
त्प्राणैः कंठगतैरपि स तीर्त्वा मंडलं भानोः परं ब्रह्माधिगच्छति तत्र सावकाशानवकाशभेदेन द्विविधः
यो०४ निरवकाशश्चेदेवं प्रकारः संन्यस्तमिति ब्रूयात् प्राणैः कंठगतैरपि न तत्क्रतुसहस्रेण फलं प्राप्नोति मानवः
इति स्मरणेः यद्यातुरः स्यान्मनसा वाचा संन्यसेदिति श्रुतेश्चेति अथ सावकाशस्यातुरस्य संन्यासस्य प्र
योगः तत्रादौ आपां समीपे गत्वा तिथ्यादिस्मरणपूर्वकं स्नानं संध्यावंदनं च [illegible] संन्यासे संकल्पं कुर्या ३
त् तद्यथा अद्येत्यादि पुण्यतिथौ विसंतमुक्ता मम अशेषदुःखनिवृत्ति [illegible] निरतिशयानंदप्राप्तिपर

म पुरुषार्थप्राप्तये परमहंसाश्रमरूपं संन्यासं करिष्ये इति संकल्प्य संन्यासोचितं क्षौरं कृत्वा पुनः स्नानं कृत्वा
आपः पूरितपात्रद्वयोः कृत्वा दक्षिणेन पाणिना जुहुयात् एषवा अग्निर्यथः प्राणापानं गच्छ स्वां योनिं गच्छ स्वा णः२
द्रु३ हेति प्रथमपात्रस्थं जलं जुहुयात् आपो वै सर्वा देवताः सर्वा एव एवैनं देवताभ्यो जुहोमि स्वाहेति द्वितीयपात्र
द्रु४ स्थं जलं जुहुयात् एवं मात्रे हुतं हृदयं मध्ये स्वाहाकृत्वा ततो पात्रद्वयात् हुतशेषमातुः शिशानइस् नुवाकेनाभि
मंत्र्य पुत्रैषणा वित्तैषणा लोकैषणा स्वाहा स्य शेषं प्रथमपात्रस्थं सर्वं पिबेत् ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं०
संकल्प ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्स्वरों संन्यस्तं मयेति द्वितीयपात्रस्थं जलं पिबेत् अभयं
सर्वभूतेभ्यो मत्तः स्वाहेति द्वितीयवारं पिबेत् ॐ भूर्भुवः स्वः संन्यस्तं मया स्वाहेति निःशेषं पिबेत् ततो न्य
स्तविंतो ये अंजलिं पूर्णं कृत्वा प्राच्यां दक्षिणस्यां प्रतीच्यामुदीच्यां भूम्यां प्रक्षिपेत् ततः ऊर्ध्वबा
हुः सूर्याभिमुखो भूत्वा संन्यस्तो हमिति मंत्रमध्यमोच्चस्वरेण त्रिर्ब्रूयात् तद्यथा ॐ भूः संन्यस्तं मया ॐ
भुवः संन्यस्तं मया ॐ स्वः संन्यस्तं मया ॐ भूर्भुवस्स्वः संन्यस्तं मया इति प्रैषोच्चारणं त्रिवारं कृत्वा ततः

स्यः२ श्रि

२ सीशिखास्थाने स्थापितान् सप्त केशानुत्पाद्य यज्ञोपवीतं विसृज्याग्नौ निक्षिप्य एकीकृत्य भस्मी
त्यसोदकेनांजलिना सह गृहीत्वा भूर्भुवः स्वाहेति अप्सु जुहुयात् ततः किंचिद्दिगंबरो भूत्वा किंचि
दूरं गच्छेत् ततः कौपीनं काषायं दंडं कमण्डलुं गोपीचंदनं विभूतिं च स्वीकृत्य गृहीत्वा अतऊर्ध्वं गुरु
ना गच्छेत् मृते तु विष्णुं ध्यात्वा पुरुषसूक्तादिभिरभिषेकादिकं कृत्वा यथाविधि संस्कुर्वीत आसन्ने
मरणे तु आतुराणां प्रैषमात्रोच्चारणं कुर्यात् नान्यत् तदनंतरं जीवति चेत् सद्गुरुं प्राप्य विधिना
महावाक्योपदेशादिकं कुर्यात् आहिताग्निश्चेत् प्राजापत्यां वैश्वानरीं वा इष्टिं सर्वस्वदक्षिणाभि
कं कुर्यात् इष्टिं श्रौतं कौपीनं देवतायां आहवनीये पूर्णाहुतिं जुहुयात् असौ स्वर्गाय लोकाय स्वाहे
त्याहवनीये दारुमयाणि भूत्वा स्व ... निक्षिपेत् अयं ते योनिरित्यनेन अग्नीन् आत्मनि यतनु रि
तिहुत्वाग्निं मध्ये ... समारोप्य संन्यसेदिति इत्यातुरसंन्यासविधिः अथ संस्कारविधिः यते २
श्चतुर्विधस्यापि येन क्रियते विधिः स्नानागर हस्ते उद्धृत्य यति संस्कारमाचरेत् यतो मृतेन वप

नं नोदकं नैव चक्रिया नाशौचं नैव शोकश्च बंधूनां गोत्रिणामपि सपिंडीकरणान्ते पानकं तर्पणं सुतादिभिः द
शाहं तु यतिकर्मान्ते पुत्रः कुर्वीत पार्वणं प्रत्यब्दं पार्वणं कुर्यादेव धर्मः सनातनः एकादशाहादूर्ध्वं यतेः पितृमेधः स्मृ
तौ कृत्संनंतरं एकादशाहे सुतः पार्वणं कार्यमिति वै श्रीधरान्वि के याद्दक्लतिम ज्ञातीमार्गेशीर्षे शुक्ले दू त्वा
दश्यां पार्वणं कार्यं अथ प्रयोगः तत्रादौ पुत्रो वपनं कृत्वा स्नात्वा धम्य देशकालौ संकीर्त्य अस्मत् स्वास्म प्राणानायम्य
पितुः परमहंस परिव्राजकपदवीं प्रविष्टस्य महाविष्णुस्वरूपस्य देहसंस्कारं करिष्ये इति संकल्प्य नवकुंभं
पावनतीर्थोदकं पानीयं पूरयित्वा गंगे च यमुने चैव गोदावरि सरस्वति आ नर्मदे
दोलिकां शिक्यं वा ... तस्मिन्नीत्वा ... सघोषं ... ततः कलशोदकमानी
य विष्णुं ध्यात्वा पुरुषसूक्तादिभिः स्नापयेत् ... तं लेपयेत् ... गंधाक्षतपुष्पं चन्
दनं ... पुष्पं समर्पयेत् इति ... प्राचीमुदीचीं गत्वा शुद्धदेशे समाश्रित
नदीतीरे ... शिवालये वा ... वृक्षस्य छाया ... पुरुषप्रमाणां भूमिं खनित्वा
कूपवत् ... ततः अंतः व्याहृतिभिः प्रोक्ष्य पुष्प ... दर्भानास्तीर्य

२ तद्दक्षिणभागे यतिशरीरं साक्षिग्राभोद्भ्य अपोवेन शतवारं स्नापयित्वा ततः शंखतोयैः पुरुषसूक्तं पठन्
स्नापयेत् ततः शिरसि पादे वा गंधपुष्पैः सम्यर्च्य नारायणं ज्ञयक्ते यतिवदनं वस्त्रमध्ये आनीय विष्णो
हव्यं रक्षस्वेति शरीरमूरं ज्ञुरेख न्यासेन स्नुरवासनेवा स्थापयेत् ~~ततः शंखं ... कर्ता~~ इदं विष्णुरिति दंडं
खंडयित्वा दक्षिणहस्ते स्थापयेत् ततः संस्कारकर्ता हृदि दक्षिणहस्तं निधाय हंसः शुचिषदिति मंत्रं पठेत्
ब्रह्म जज्ञानमिति मूर्ध्नि स्पृष्ट्वा जपेत् भ्रुवोर्मध्ये पुरुषसूक्तं पठेत् रक्षोहणमिति शिरसि नारायणो वाप
स्तुनो वाम धीनीं संघ्रात् ततः भूर्भुवः स्वरोमिति इममिमं त्र्यम्बकं मध्ये घनलवणानं स्पर्शयित्वा दत्तैः शिखाद्यग्रण
वेनरयेत् अग्निनाग्निः समिध्यत इति चतुर्भिर्मन्त्रैः स्पृष्ट्वा होतारमिति द्वाभ्यां अभिमंत्रयेत् शृगालादि
इति४ रक्षणार्थं सम्यक् गर्ते स्थापयेत् त्रिदंडी विषये निदध्याद्ब्राह्मणवनेन वध्यान्नाभिसीके हेवरं ओष्ठणं खनेन
चैव सर्वं तेनैव कारयेत् इति परमहंसानुपूर्वं अस्मिन्नेतावपि अतऽर्ध्वं मंत्रं तदाचरेदिति शृगालादि
दयो यद्वै तस्य यदुर्जनन तथा कुर्युर्यं च देशादुर्भिक्षाद्युपजायते तस्मान्मृत्तिकापाषाणाद्यैः करादि
भिर्वेदं परिपिष्वा वेदिं कुर्यात् गंगादिसमुद्रगामिषु नदीषु वेदमंत्रैः प्रतं कृत्वा पाषाणाद्यैः दृढं बध्वा २

स्वाहांते प्रणवेन मोचयेत् हंसमिति यत्र गंगाद्यभावस्तत्र खातमेवोचितमिति तथा शुचौ देशे यत्र कुत्र
चिद्रूपादादिष्ठे दनं कृतं श्वकीर्ये दथवा समुद्रगंभीरजले वा परमहंसं मोचयित्वा गृहं गच्छेदिति केषांचिन्म
तेतु दानाः कुटीचकं संप्रदहेद्बहूदकं जले क्षिपेत् हंसं चैव तु निक्षिप्य परमहंसं प्रकीरयेदिति बहुसंमतं॥
तथा अश्वत्थस्थापनं कार्यं तदुक्तं शौनकेन मुने दर्शनात्स्पर्शनात्तस्य सर्वं नश्यति पातकं यतिं च हंसस्पर्शा
श्वैव स्नानमात्रेण शुध्यति अश्वमेधफलं सर्वं प्राप्नुवंति पृथक् पृथक् असाक्षिकस्य पुत्रस्य
सिद्धिर्वा तीर्थकृत्वा वपनं स्नानं नादिकं के स्वो वक्ष्यमाणमेकादशाहिकं कार्यं दशाहमध्ये पुरुषसूक्ते हा४
न प्रत्यृचं षोडशवारं शंखोदकेन तर्पयेदिति हारीतवाक्यं पुत्रादीनां यतिमरणे आशौचाभावः त
थाच ज्ञातिपुत्रकलत्राणां परिव्राजकमरणे यदि आशौचं नास्ति तेषां वै स्नानमा
त्रमाचरेत् यतीनां मरणे स्नात्वा स्पर्शदोषो न विद्यते आशौचं बुध्वा स्नातस्य द्विज

४ यत्रांशतोऽरइति इतिपातिदृष्टसंस्कारविधिः अथविष्णुश्राद्धप्रयोगः तत्रादौ कायशादि
नद्यांस्नात्वा नदीतीरे हस्तमात्रंचतुरस्रां वेदींकृत्वां तत्र तिलपीठे इं श्रा॥ तीमाभरस्य दक्षिणसंस्थो
क्रमेणपापंचकुशाग्रं दीन्स्थापयेत् ततः प्राणानायम्यदेशकालौ स्मृत्वा ब्रह्मीभूतस्यमम
पितुः करिष्यमाणायावर्णश्राद्धादिसकलपैतृककर्मकरणयोग्यतासिध्यर्थंपितृमूर्तिश्रीमहा
विष्णुप्रीत्यर्थंविष्णुश्राद्धंकरिष्येइतिसंकल्प्य पंचकुशाग्रेषुपूर्वादिशानमारभ्यक्रमेणदेवतावाहयेत्
सहस्रशीर्षानारायणः पुरुषोनुष्टुप् विष्णुमावाहनेविनियोगः प्रथमंविष्णुमावाहयेत् हि
रण्यगर्भोहिरण्यगर्भःप्रजापतिस्त्रिष्टुप् द्वितीयंब्रह्माणमावाह्य कद्रुद्रायघोरःकण्वोरु
द्रोगायत्री रुद्रावाह्य यमायसोमंयमोनुष्टुप् यममावाहनेविनियोगः स्वर्ध्वयमाय ब्राह्मी
भूत्वा स्मृत्वा श्रीविष्णुंपंचममावाह्य पुरुषसूक्तहिरण्यगर्भादिभिर्मंत्रैर्नाममंत्रेणापचपंचभिः ४
क्रमेणपाचदेवताभ्यो [illegible] षोडशोपचारैः संपूज्य ॥ श्री ॥ ॥ तत्रश्रा

खेनपंचप्रानांस्नानं गंधाक्षततुलसीपुष्पधूपदीपादीन एवं यथाविभवेन
विष्णुंसंपूज्य ततोग्निवेद्याः पश्चिमदेशेस्थंडिलंकृत्वा स्वगृह्योक्तमार्गेणाग्र
ग्निंप्रतिष्ठाप्यान्वाधानंकुर्यात् तत्रविष्णुश्राद्धहोमेदेवतापरिग्रहार्थंअ
न्वाधानंकरिष्ये इतिसंकल्प्य अस्मिनन्वाहिताग्नावित्यादिचक्षुष्यंतमुक्त्वा
क्रमि: ब्रह्मीभूतास्मत्पितृमूर्तिमहाविष्णुंषोडशोपचारैः चरुणाशेषेणेत्यादिसद्योयक्ष्यइ
त्यंतमुक्त्वा परिसमूह्यनाघ्युद[illegible]गुद्वासनांतंस्थालीपाकंचकृत्वा पात्रांतरेवाध्य
स्य अग्न्यन्वाधानादिआज्यभागांतंकृत्वा स्नुक्स्नुपर्यस्तीर्येयज्ञमवदानधर्मेणावदा
य पुरुषसूक्तस्य षोडशमंत्रैःप्रतिमंत्रमेकैकांचरुवाहुतिंहुत्वा ब्रह्मीभूतायपित
रूपिणेमहाविष्णवेनममेत्युद्देशत्यागंकुर्यात् अथवा प्रत्याहुतीचतुरश्चतु
रोमुष्टीनाहुतिसंख्ययाचरुहवींषिनिरूप्य तथैवप्रोक्ष्य आवाहनादिकुर्यात् मंत्रा

स्तुस्वाहांताः प्रयोक्तव्याः ततः स्विष्टकृदादिहोमशेषं समाप्य ततो दक्षि
५ णाभिमुखो भूत्वा देवताग्न्योरग्निमध्ये दक्षिणाग्रान्दर्भानास्तीर्य यवचूर्णेण
तिलमधुघृतैर्युतान् दशपिंडान्कृत्वा प्राचीनावीती अस्मिन्निर्हृतास्मत्पित्रे अ या०
मुकशर्मणे मुकगोत्राय महाविष्णुरूपिणे अयं पिंडः स्वधा नमम इति दक्षिणसंस्थाः
क्रमेण दशपिंडान्दद्यात् ततः कुशेन शंखोदकेन पुरुषसूक्तेन पिंडानभिषि
च्य गंधादिभिः संपूज्य नमो वः पितर इत्युपस्थाय परेतन इति प्रवाह्य तान्
पिंडान्नद्यादिजले क्षिपेत् ततो अस्मिन्निर्हृतास्मत्पितुर्नामगोत्रे उच्चार्य वि महा०
ष्णुं तर्पयामीति पुरुषसूक्तेन प्रतिमंत्रं षोडशवारं तर्पयेत् ततः पंचदेवता
भ्यो कदलन्नादि मधुरफलानि आम्रफलानि बदर्यादीनि फलानि श
र्करामधुगुडसर्पिर्षीनि नैवेद्यं समर्पयेत् ततः देवतापंचकमुद्दिश्य पं

चेभ्यो ब्राह्मणेभ्यो पाद्यार्घ्यासनादिभिः संपूज्य भक्ष्यभोज्यादियुक्तं अन्नं
परिविष्य देवतापंचकोद्देशेन प्रत्येकं त्यागं कृत्वा आपोशनं दत्वा भोजयेत्
भुक्तवत्स्वर्चति एष्वन्नं तेषु तत्समुल्लेखास्तु पिंडपितृयज्ञोक्तप्रकारेण विष्णवे ब्र
ह्मणे शिवाय यमाय परिवारसहिताय चतुरः पिंडान्दद्यात् अत्र प्राचीनावीत्य
पवीत्योर्विकल्पः उल्लेखश्चैवं अस्मिन्निर्हृतास्मत्पितृरूपिणे विष्णवे अयं पिंडः स्वधा न
मः ब्रह्मणे अयं पिंडः स्व० शिवाय अयं पिंडः स्व० यमाय अयं पिंडः स्वधा० अथ पिंडपूजां
कृत्वा पूर्ववत्प्रवाह्य आसनपात्रेण तान्दक्षिणाभिस्तोषयित्वा मुख्यस्थानस्थं ब्राह्म
णं विशेषतो तोषयेत् ततस्तैः पवित्रपाणिभिः ब्राह्मणैः अस्मिन्निर्हृताय यजमान पै:
स्य पित्रे अमुकशर्मणे मुकगोत्राय महाविष्णवे पाद्येदं तिलोदकं स्वधा नमम इ
ति वाचयित्वा सकुशान्तिलोदकांजलिं कुशाग्रेणोत्सर्पयेत् अन्नाकरणाद्यशक्तो
वामान्नं दत्वैतन्मंत्रं कुर्वीतेति विष्णुश्राद्धं अथ पार्वणश्राद्धप्रयोगः एकादशी

स. ५ हे ब्राह्मणेभ्यः क्षणं दत्वा आर्यंगादिना ब्राह्मणान्समानीय आचान्तानाचम्य देशका
लौ स्मृत्वा ब्रह्मीभूतास्मत्पितुरमुकशर्मणोऽमुकगोत्रस्य शाश्वतनिरतिशया
नंदरूपपरमहंसपरिव्राजपदवीमधिष्ठस्य महाविष्णुस्वरूपस्योपशांतिदिवसा
दारभ्यैकादशाहनि पित्रादिपुरुषत्रयमुद्दिश्य पार्वणविधिना पार्वणश्राद्धं स
पिंडं सदैवं अन्नेन हविषा वा करिष्य इति संकल्प्य आसन्निहितपुत्रश्चे
ध्रुवणादिवसादारभ्येति विशेषः पात्रपूरणादि दर्शवत् पुरूरवार्द्रवसंज्ञका
नां विश्वेषां देवानां स्थाने त्वया क्षणः करणीय इति द्वौ विप्रौ निमंत्र्य ब्रह्मीभूता
स्मत्पितुरमुकशर्मणोऽमुकगोत्रस्य वसुरूपस्य स्थाने त्वया क्षणः क्रियतां एवम
स्मत्पितामहस्यामुकगोत्रस्य रुद्ररूपस्य स्थाने त्वया क्षणः क्रियतां एवमस्म ५
त्प्रपितामहस्यामुकशर्मणोऽमुकगोत्रस्यादित्यरूपस्य स्थाने त्वया
क्षणः क्रियतां इत्यादि द्वितीयनिमंत्रणांतं कृत्वा पाद्यादिकं प्रतिसांव

त्सरिकवत् कुर्यात् आचम्य देशकालौ स्मृत्वा ब्रह्मीभूतस्यास्मत्पितुरूप
शांतिदिवसादारभ्यैकादशेऽहनि पार्वणश्राद्धं करिष्ये इति संकल्प्य
तिलान्विकीर्य इत्यादि ततः पुरूरवार्द्रवसंज्ञकानां विश्वेषां देवानां इदमास
नमित्यादि प्रकृतिवत् ब्रह्मीभूतस्यास्मत्पितुरूपशांतिदिवसादारभ्यैकाद
शेऽहनि पार्वणश्राद्धे क्षणः क्रियतामित्याद्युल्लेखने विशेषः अन्यत्सर्वं सांव
त्सरिकवत् कुर्यात् मोक्षधेनुपूजां कृत्वा प्रार्थ्य विष्णुं प्रार्थ्य मोक्षं देहि हृषीके
श मोक्षं देहि जनार्दन मोक्षधेनुप्रदानेन मुकुंदः प्रीयतां मम १ नमस्का
रं कृत्वा मोक्षधेनुं दद्यात् इत्येकादशाहकृत्यं अथ द्वादशाहकृत्यं अथ
द्वादशेऽहनि यतीन्साधून् गृहस्थान्वा ब्राह्मणान् त्रयोदशसंख्याकान्निमं
त्र्य तिलैः स्नात्वा आचम्य देशकालौ संकीर्त्य ब्रह्मीभूतस्यास्मत्पितुरमुकशर्मणो

मुकगोत्रस्य शाश्वतनिरतिशयानंदविष्णुलोकप्राप्त्यर्थं विष्णुबल्याख्यं
कर्म करिष्ये इति संकल्प्य नदीतीरे गृहे वा वेदीं पूर्ववत्कृत्वा शालग्रामादिक
मानीय तत्र संस्थाप्य संकल्पयेत् तत्र पूर्ववद्देशकालौ स्मृत्वा नारायणबल्यंग
त्वेन विष्णोर्महापूजां करिष्ये इति संकल्प्य स्थंडिलेग्निं प्रतिष्ठाप्यान्वाधाय
पुरुषसूक्तेन विष्णुं पूजाविभवेन संपूज्य पायसाज्यशर्करा नैवेद्य फ
लतांबूलदक्षिणा वस्त्र समर्प्य समाप्याग्न्याज्यभागांतं कृत्वा व्याहृति
भिरष्टोत्तरशतं पायसेन हुत्वा होमशेषं समाप्य विष्णवे पुष्पांजलिं दत्वा
फलानि समर्प्य त्रयोदशनामेकं विप्रं गुरुमूर्तिमहाविष्णुनाम्ना अन्या
न्द्वादश केशवादिनामभिः पाद्यासनार्घ्यगंधधूपदीपाच्छादनैस्तै रूपचा
रैरर्चयेत् ॥ विश्वरूपमहामूर्त्ते परमहंसगुरो इदं ते पाद्यं । गुरुमूर्ते विश्व

तपणा

रूपमहाविष्णो इदं ते पाद्यमिति वा परमहंसगुरुमूर्ते केशव इदं ते पाद्यं पर
महंसगुरुमूर्ते नारायणाख्य इदं ते पाद्यं परमहंसगुरु० माधव० पर० गो
विंद० विष्णु० मधुसूदन० त्रिविक्रम० वामन० श्रीधर० हृषीकेश० पद्म
नाभ० दामोदर० इदं ते पाद्यं एवं त्रयोदशब्राह्मणानां पाद्यं दत्वाचम्य देश
कालौ स्मृत्वा विश्वरूपमहाविष्णुमूर्तेः परमहंसगुरोराराधनं करिष्ये इति
संकल्प्य विश्वरूपपरमहंसगुरोरिदमासनं परमहंसगुरोरिदमासनं मू
र्ते नारायणस्येदमासनं माधवस्येदमासनं इत्यादि द्वादशनामसु षष्ठ्यंते
नासनं दत्वा संबुद्ध्यंतेनार्घ्यं दत्वा द्वितीयांतेनावाह्य संबुद्ध्यंतेन गंधाक्षता
पुष्पधूपदीपानि दत्वा चतुर्थ्यंतेन वस्त्रालंकरणानि दत्वा प्रतिपदार्थे
हस्तोदकपूर्वकं कृत्वा सकलाराधनं स्वर्चितमस्त्विति कृत्वा मंडलादिपात्र
परिवेषणं कृत्वा गायत्र्या प्रोक्ष्य पृथ्वी ते पात्रं स्वधा श्रीविष्णोः अन्ना

सन्या· ८ दिरक्षस्व विश्वरूपमहाविष्णुमूर्त्ते परमहंसगुरो इदमन्नं हविरमृतं ब्राह्मणस्त्वा
हवनीयार्थे दत्तं दास्यमानं चाक्षतोस्तु स्वीमिय भूमिर्गायत्री भोक्ता गेहाध
वोन्नं ब्राह्मणहस्ते ब्रह्मरूपमन्नं विश्वरूपमहाविष्णुमूर्त्तये परमहंसगुरवे इद
मन्नं मम हन्त रूपं स्वधा संपद्यतां न ममेति वदेत् एवं पृथिवी ते पात्रमित्यादि
रक्षस्वेत्यन्तमुक्त्वा परमगुरुमूर्त्ते केशवायेदमन्नं हविरित्यादि रक्षस्वेति ब्रह्म
स्वरूपमन्नमित्यंतमुक्त्वा परमगुरुमूर्त्ते केशवायेदमन्नं मम हन्त रूपं स्व
धा वदेत् पुनः पृथ्वी ते पात्रमित्याद्युक्त्वा केशवस्थाने संबुध्यंतेन चतुर्थ्यंते
न चाः नारायणादि नामान्युच्चार्य स्वधा संपद्यतां न ममेत्युक्त्वा ब्रह्मार्पणं
ब्रह्महविरित्येको विष्णुर्महद्भूतमिति श्लोकद्वयं पठित्वानेन ब्राह्मणसमा ग ८
राधनेन विश्वमूर्त्तिः परमगुरुमूर्त्तयः केशवादयः प्रीयंतां ब्रह्मीभूता